श्री लक्ष्मीनृसिंहाष्टकं

श्री लक्ष्मीनृसिंहाष्टकं

यं ध्यायसे स क्व तवास्ति देव
इत्युक्त ऊचे पितरं सशस्त्रं |
प्रह्लाद आस्तेखिलगो हरिः स
लक्ष्मीनृसिंहोऽवतु मां समंतात् || 1 ||

तदा पदाताडयदादिदैत्यः
स्तंभं ततोऽह्लाय घुरूरुशब्दं |
चकार यो लोकभयंकरं स
लक्ष्मीनृसिंहोऽवतु मां समंतात् || 2 ||

स्तंभं विनिर्भिद्य विनिर्गतो यो
भयंकराकार उदस्तमेघः |
जटानिपातैः स च तुंगकर्णो
लक्ष्मीनृसिंहोऽवतु मां समंतात् || 3 ||

पंचाननास्यो मनुजाकृतिर्यो
भयंकरस्तीक्ष्णनखायुधोऽरिं |
धृत्वा निजोर्वोर्विददार सोऽसौ
लक्ष्मीनृसिंहोऽवतु मां समंतात् || 4 ||

वरप्रदोक्तेरविरोधतोऽरिं
जघान भृत्योक्तमृतं हि कुर्वन् |
स्रग्वत्तदंत्रं निदधौ स्वकंठे
लक्ष्मीनृसिंहोऽवतु मां समंतात् || 5 ||

विचित्रदेहोऽपि विचित्रकर्मा
विचित्रशक्तिः स च केसरीह |
पापं च तापं विनिवार्य दुःखं
लक्ष्मीनृसिंहोऽवतु मां समंतात् || 6 ||

प्रह्लादः कृतकृत्योऽभूद्यत्कृपालेशतोऽमराः |
निष्कंटकं स्वधामापुः श्रीनृसिंहः स पातु मां || 7 ||

दंष्ट्राकरालवदनो रिपूणां भयकृद्भयं |
इष्टदो हरति स्वस्य वासुदेवः स पातु मां || 8 ||

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीवासुदेवानंदसरस्वती विरचितं श्री लक्ष्मीनृसिंहाष्टकं |